# श्रीरघुवर्यतीर्थस्तुतिः

रघुनाथकराब्जोत्थं मूलरामपदार्चकम् ।
रघुवर्यमहं वंदे देवार्चाभाग्यसिद्धये ॥१॥

पेन्गोंडनामके ग्रामे हनूमत्स्थापकं मुनिम् ।
रघुवर्यमहं वंदे प्राणार्चाभाग्यसिद्धये ॥२॥

भीमानदी ददौ मार्गं यस्मै रामयुताय तम् ।
रघुवर्यमहं वंदे भवोत्तारणसिद्धये ॥३॥

रघूत्तमगुरोस्तारस्योपदेशविधायकम् ।
रघुवर्यमहं वंदे सन्मंत्रजपसिद्धये ॥४॥

सच्छास्त्रं पाठयंतं श्रीरघूत्तममुनिं प्रति ।
रघुवर्यमहं वंदे सच्छास्त्रज्ञानसिद्धये ॥५॥

मंत्राक्षतप्रदानेन सत्पुत्रप्रापकं गुरुम् ।
रघुवर्यमहं वंदे सत्पुत्रप्राप्तिसिद्धये ॥६॥

रघूत्तममुनेः स्वप्न उपदेशप्रदायकम् ।
रघुवर्यमहं वंदे ह्यश्रुतज्ञानसिद्धये ॥७॥

रघूत्तममुनिद्वारा मठवैभववर्धकम् ।
रघुवर्यमहं वंदे सद्वैभवसुसिद्धये ॥८॥

गजगह्वरगं तुंगभद्रातीरनिवासिनम् ।
रघुवर्यमहं वंदे नदीस्नानसुसिद्धये ॥९॥

पद्मनाभकवींद्रादिपूर्वे संस्थितमादरात् ।
रघुवर्यमहं वंदे गुर्वनुग्रहसिद्धये ॥१०॥

सत्यात्मरचितं पद्यदशकं यः पठेत् सुधीः ।
तस्यैताः सिद्धयः सर्वा हस्तगा नात्र संशयः ॥११॥

॥ इति श्रीरघुवर्यतीर्थस्तुतिः ॥